उपप्रदानं, क्ली, (उप समीपे प्रदानम् ।) उत्कोचः । इति हेमचन्द्रः ॥ घुस इति भाषा । (यथा कथासरित्सागरे २४ तरङ्गे ।
"उपप्रदानं लिप्सूनामेकं ह्याकर्षणौषधम्" ॥)

उपप्लवः, पुं, (उप + प्लु + अप् ।) राहुग्रहः । विप्लवः । उत्पातः । इति मेदिनी ॥
("उपप्लवाय लोकानां धूमकेतुरिवोत्थितः" ।) इति कुमारे । २ । ३२ ।) ग्रहणम् । यथा "उपप्लवे चन्द्रमसो रवेश्च" । इति स्मृतिः ॥ (उत्पातसूचकोऽनिलादिः । यथा, "कच्चिन्न वाय्वादिरुपप्लवो वः" । इति रघुः । ५ । ६ । भीतिः । "नृपाइवोपप्लविनः परेभ्यः" । इति रघुः । १३ । ७ ।
"उपप्लविनो भयवन्तः" । इति मल्लिनाथः ॥)

उपभूषणं, क्ली, (उपमितं भूषणेन ।) घण्टाचामरादि । यथा,—
"घण्टाचामरकुम्भादिपात्रोपकरणादिकम् ।
तद्भूषणान्तरे दद्यादयस्मात्तदुपभूषणम्" ॥ इति ।
"प्रावारः पानपात्रञ्च गेण्डुको स्रृहमेव च ।
पर्य्यङ्कादि यदन्यच्च सर्व्वं तदुपभूषणम्" ॥
इति च कालिकापुराणे ६८ अध्यायः ॥

उपभृत्, स्त्री, (उप + भृ + क्विप् ।) चक्राकारयज्ञपात्रं । इत्यमरः ॥ (यथा, श्रौतसूत्रे । १ । १० । ६ ॥
"पाणिभ्यां जुहूं परिगृह्योपभृत्याधानम् ॥)

उपभोगः, पुं, (उप + भुज + घञ् ।) भोजनातिरिक्तभोगः । तत्पर्य्यायः । निर्व्वेशः २ । इत्यमरः ॥
("प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन्" । इति रघुः । १२ । २२ । तथा च स्मृतिः ।
"आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा" ।
"न जातु कामः कामानामुपभोगेन शाम्यति" ।
इति मनुः । २ । ९४ ॥)

उपमा, स्त्री, (उपमीयते इति । उप + मा + अङ् + टाप् ।) उपमानम् । सादृश्यम् । इत्यमरः ॥
("स्फटोपमं भूतिसितेन शम्भुना" । इति माघे १ । ४ ।
"अपि लङ्घितमध्वानं बुबुधे न बुधोपमः" ।
इति रघुः । १ । ४७ ।) तस्य वैदिकपर्य्यायः । इदमिव १ इदं यथा २ अग्निर्णये ३ चतुरश्चिद्ददमानात् ४ ब्राह्मणाव्रतचारिणः ५ वृक्षस्यनुतेपुरुकृतवयाः ६ जारआभगं ७ मेषोभूतोऽभीयन्नयः ८ तद्रूपः ९ तद्वर्णः १० तद्वत् ११ तथा १२ ।
इति द्वादशोपमाः । इति वेदनिघण्टौ ३ अध्यायः ॥ (अर्थालङ्कारभेदः । विस्तृतिस्तु उपमालङ्कारशब्दे द्रष्टव्या ।)

उपमाता, [ऋ] स्त्री, (उपमिता माता ।) धात्री । इति जटाधरः । मातुः सदृशी । सा षड्विधा यथाह स्मृतिः ।
"मातुःष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः" ॥
उपमानकर्त्तरि त्रि ॥

उपमानं, क्ली, (उपमीयते इति । उप + मा + ल्युट् ।) उपमा । इत्यमरः ॥ (यथा, कुमारे । ४ । ५ ।
"उपमानमभूद्विलासिनां
करणं यत्तव कान्तिमत्तया" ।
सादृश्यज्ञानम् । उपमितिकरणम् । यथा गौर्गवयस्तथेतिवाक्ये । "प्रसिद्धसाधर्म्म्यात् साध्यसाधनमुपमानम्" । इति न्यायसूत्रम् । प्रसिद्धस्य पूर्व्वप्रमितस्य गवादेः साधर्म्म्यात् सादृश्यात् तज्ज्ञानात् साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिरुपमानमुपमितिर्यत इत्यध्याहारेण च करणलक्षणम् । अत्र च वैधर्म्म्योपमितिमपि मन्यन्ते टीकाकृतः । यथा च अतिदीर्घग्रीवत्वादिपश्वन्तरवैधर्म्म्यज्ञानात् । उष्ट्रे करभपदवाच्यताग्रहः । एवमन्योऽपि उमानस्य विषय इति भाष्यं । तथा मुद्गपर्णीसदृशी ओषधी विषं हन्तीत्यतिदेशवाक्यार्थे ज्ञाते मुद्गपर्णीसादृश्यज्ञाने जाते इयमोषधी विषहरणीत्युपमित्या विषयीक्रियते इत्यादि ॥)

उपमालङ्कारः, पुं, (उपमैव अलङ्कारः ।) साम्यालङ्कारः । यथा । उपमामाह ।
"साम्यं वाच्यमवैधर्म्म्यं वाक्यैक्य उपमा द्वयोः" ।
तद्भेदाः । सा द्विविधा । पूर्णा लुप्ता च । तल्लक्षणम् । यथा, —
"सा पूर्णा यदि सामान्यधर्म्म औपम्यवाचि च" ।
इयं पुनः श्रौत्यार्थी च । तल्लक्षणन्तु ।
"श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदि ।
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः" ॥
द्वे त्रिधा । तद्धिते समासेऽथ वाक्ये । उदाहरणम् ।
"सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले" ॥
अत्र क्रमेण त्रिविधा श्रौती ।
"मधुरः सुधावदधरः
पल्लवतुल्योऽतिपेलवः पाणिः ।
चकितमृगलोचनाभ्यां
सदृशी चपले च लोचने तस्याः" ॥
अत्र क्रमेण त्रिविधा आर्थी । पूर्णा षड़ेव तत् ।
"लुप्ता सामान्यधर्म्मादेरेकस्य यदि वा द्वयोः ॥
त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्व्ववत्" ॥
इयञ्च तद्धिते श्रौत्या असम्भवात् पूर्व्वोक्तरीत्या पञ्चप्रकाराः । उदाहरणम् ।
"मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये ।
वाचः सुधा इवौष्ठस्ते बिम्बतुल्यो मनोऽश्मवत्" ॥
"सा लुप्ता पञ्चधा पुनः ।
आधारकर्म्मविहिते द्विविधे च क्यचि क्यङि ।
कर्म्मकर्त्रोर्णमुलि च स्यादेवं पञ्चधा पुनः" ॥
उदाहरणम् ।
"अन्तःपुरीयसि रणेषु सुतीयसि त्वं
पौरं जनं तव सदा रमणीयते श्रीः ।
दृष्टः प्रियाभिरमृतद्युतिदर्शमिन्द्रसञ्चारमत्र भुवि सञ्चरसि क्षितीश" ॥
तदेवं दशप्रकारा लुप्ता । सा पुनर्द्विधा । वाक्यगता समासगता च । यथा ।
"उपमानानुपादाने द्विधा वाक्यसमासयोः" ।
श्रौत्यार्थीत्वभेदेन चतुर्व्विधत्वसम्भवेऽपि प्राचीनरीत्या द्विप्रकारत्वमेवोक्तम् । पुनर्द्विधा ।
"औपम्यवाचिनो लोपे समासे क्विपि च द्विधा"
उदाहरणम् ।
"वदनं मृगशावाक्ष्याः सुधाकरमनोहरम्" ।
"गर्द्दभति श्रुतिपरुषं व्यक्तं निनदन्महात्मनां पुरतः"
पुनर्धर्म्मोपमानयोर्लोपे द्विधा । तद्यथा ।
"द्विधा समासे वाक्ये च लोपे धर्म्मोपमानयोः" ।
उदाहरणम् ।
"तस्या मुखेन सदृशं रम्यं नास्ते न वा नयनतुल्यम्" ।
पुनर्द्विधा ।
"क्विप्समासगता द्वेधा धर्म्मे वादिविलोपने" ।
उदाहरणम् । विधवति मुखाब्जमस्या इत्यादि ।
"उपमेयस्य लोपे तु स्यादेका प्रत्यये क्यचि" ।
उदाहरणम् । .
"अरातिविक्रमालोकविकस्वरविलोचनः ।
कृपाणोदग्रदोर्द्दण्डः स सहस्रायुधीयति" ॥
धर्म्मोपमेयलोपेऽन्या च । उदाहरणम् । "यशसि प्रसरति भवतः क्षीरोदीयन्ति सागराः सर्व्वे" ।
त्रिलोपे च समासगा । यथा । राजते मृगलोचनेत्यादि ।
"तेनोपमाया भेदाः स्युः सप्तविंशतिसंख्यकाः" ।
पूर्णा षड़्विधा । लुप्ता चैकविंशतिविधेति मिलित्वा सप्तविंशतिप्रकारोपमा" । इति साहित्यदर्पणस्य १० परिच्छेदात् संगृहीतः ॥

उपमितिः, स्त्री, (उप + मि + क्तिन् ।) उपमा । इति शब्दरत्नावली ॥ न्यायमते सादृश्यज्ञानजन्यज्ञानम् । यथा "गोसदृशो गवयपदवाच्य इत्याकारशक्तिज्ञानम् । अस्य करणं गवादिसादृश्यवत् पिण्डप्रत्यक्षम् । अस्य व्यापारः अतिदिष्टवाक्यार्थस्मरणम्" । इत्युपमानखण्डम् । अपि च । भाषापरिच्छेदे ॥ ७९-८० ॥
"ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् ।
सादृश्यधीर्गवादीनां या स्यात् सोपमितिः स्मृता ॥
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते ।
गवयादिपदानान्तु शक्तिधीरुपमाफलम् ॥
पदज्ञानन्तु करणं शक्तिधीरुपमाफलम्" ॥

उपमेतः, पुं, (उपमां इतः प्राप्तः ।) शालवृक्षः । इति शब्दचन्द्रिका ॥ (शालवृक्षो हि सर्व्वोन्नतत्वात् उन्नतानामुपमास्थानम् । इत्यर्थः ॥)

उपयन्ता, [ऋ] पुं, (उप + यम + तृच् ।) पतिः । इति जटाधरः ॥ ("अथोपयन्तारमलं समाधिना" । इति कुमारे ५ । ४५ । "अथोपयन्त्रा सदृशेन युक्ताम्" । इति रघुः ॥ ७ । १ ॥)

उपयमः, पुं, (उप + यम् + अप् ।) विवाहः । इत्यमरः ॥

उपयाचकः, त्रि, (उप समीपे याचते इति । उप + याच + ण्वुल् ।) समीपे याच्ञाकर्त्ता ॥

उपयाचितं, त्रि, (उप + याच् + क्त ।) स्वेष्टसिद्धये देवाय देयं वस्तु । तत्पर्य्यायः । दिव्यदोहदम् २ । इति त्रिकाण्डशेषः ॥ (प्रार्थितम् । यथा, कथासरित्सागरे १३ तरङ्गे ।
"तस्योपयाचितान्येत्य तत्रत्याः कुर्व्वते जनाः ।
तत्तत्वाञ्छितसंसिद्धिहेतोस्तैस्तैरुपायनैः" ॥)

उपयाचितकं, त्रि, (उपयाचित + कन् ।) उपयाचि-